योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः १०

दशमः सर्गः

श्रीवसिष्ठ उवाच ।

अथ वर्षसहस्रेण दिव्येन परमेश्वरः ।

भृगुः परमसंबोधाद्विरराम समाधितः ।। १

नापश्यदग्रे तनयं विनयावनताननम् ।

सामन्तं गुणसेनायाः पुण्यं मूर्तमिव स्थितम् २

अपश्यत्केवलं कायकङ्कालं पुरतो महत्।

देहयुक्तमिवाभाग्यं दारिद्र्यमिव मूर्तिमत्।। ३

तापशुष्कवपुः कृत्तिरन्ध्रस्फुरिततित्तिरि ।

संशुष्कान्त्रोदरगुहाछायाविश्रान्तदर्दुरम्।। ४

नेत्रगर्तकसंसक्तप्रसूतनवकीटकम्।

पर्शुकापञ्जरप्रोतकोशकारकृमिव्रजम् ।। ५

प्राक्तनीऽमुपभोगेहामिष्टानिष्टफलप्रदाम्।

धाराधौतान्त्रया तद्वद्दृशं शुष्कास्थिमालया ।। ६

शिरोघटेन शुभ्रेण मसृणेनेन्दुवर्चसा ।

विडम्बयच्च कर्पूराप्लुतलिङ्गशिरःश्रियम् ।। ७

ऋज्व्या संशुष्कशिरया स्वास्थिमात्रावशेषया ।

ग्रीवयात्मानुसृतया दीर्घीकुर्वदिवाकृतिम् ।। ८

मृणालिकापाण्डुरया धारावभृतमांसया ।

नासाग्रास्थिकया वक्त्रे कृतसीमाकृतिं दधत् ।। ९

दीर्घकन्धरया नूनमुन्नतीकृतवक्त्रया ।
प्रेक्षमाणमिव प्राणानुत्क्रान्तानम्बरोदरे ।। 4.10.१०
जङ्घोरुजानुदोर्दण्डैर्द्विगुणां दीर्घतां गतैः ।
प्रतिष्ठानमिवाशान्तं दीर्घाध्वश्रमभीतितः ।। ११
उदरेणातिरिक्तेन चर्मशेषेण शोषिणा ।
प्रदर्शयदिवाज्ञस्य हृदयस्यातिशून्यताम्।। १२
प्रेक्ष्य तच्छुष्ककङ्कालमालानं दुःखदन्तिनः ।
पूर्वापरपरामर्शमकुर्वन्भृगुरुत्थितः ।। १३
आलोकसमकाले हि प्रतिभानं ततो भृगोः ।
चिरमुत्क्रान्तजीवः किं मत्पुत्रोऽयमिति क्षणात्।।१४
अचिन्तयत एवास्य भविष्यं तनयं ततः ।
कालं प्रति बभूवाशु कोपः परमदारुणः ।। १५
अकाल एव मत्पुत्रो नीतः किमिति कोपितः ।
कालाय शापमुत्स्रष्टुं भगवानुपचक्रमे ।। १६
अथाकलितरूपोऽसौ कालः कवलितप्रजः ।
आधिभौतिकमास्थाय वपुर्मुनिमुपाययौ ।। १७
खड्गपाशधरः श्रीमान्कुण्डली कवचान्वितः ।
षड्भुजः षण्मुखो बह्व्या वृतः किङ्करसेनया ।। १८
यच्छरीरसमुत्थेन ज्वालाजालेन वल्गता ।
फुल्लकिंशुकवृक्षस्य बभाराद्रेः श्रियं नभः ।। १९
यत्करस्थत्रिशूलाग्रनिःसृतैरग्निमण्डलैः ।
विरेजुरुदितैराशाः कानकैरिव कुण्डलैः ।। 4.10.२०
यत्परश्वसनापास्तशिखरा मेदिनीभृतः ।
दोलामिव समारूढाश्चेलुः पेतुश्च घूर्णिताः ।। २१
यत्खड्गमण्डलोद्द्योतैः श्यामं बिम्बं विवस्वतः ।
कल्पदग्धजगद्धूमपर्याकुलमिवावभौ ।। २२

स उपेत्य महाबाहो कुपितं तं महामुनिम् ।

कल्पक्षुब्धाब्धिगम्भीरं सान्त्वपूर्वमुवाच ह ।। २३

विज्ञातलोकस्थितयो मुने दृष्टपरावराः ।

हेतुनापि न मुह्यन्ति किं नु हेतुं विनोत्तमाः ।। २४

त्वमनन्ततपा विप्रो वयं नियतिपालकाः ।

तेन संपूज्यसे पूज्यः साधो नेतरयेच्छया ।। २५

मा तपःक्षपयाऽबुद्धे कल्पकालमहानलैः ।

यो न दग्धोऽस्मि मे तस्य किं त्वं शापेन धक्ष्यसि ।।२६

संसारावलयो ग्रस्ता निगीर्णा रुद्रकोटयः ।

भुक्तानि विष्णुवृन्दानि क्व न शक्ता वयं मुने ।। २७

भोक्तारो हि वयं ब्रह्मन्भोजनं युष्मदादयः ।

स्वयं नियतिरेषा हि नावयोरेतदीहितम् ।। २८

स्वयमूर्ध्वं प्रयात्यग्निः स्वयं यान्ति पयांस्यधः ।

भोक्तारं भोजनं याति सृष्टिं चाप्यन्तकः स्वयम् ।।२९

इदमित्थं मुने रूपं ममेह परमात्मनः ।

स्वात्मनि स्वयमेवात्मा स्वत एव विजृम्भते ।। 4.10.३०

नेह कर्ता न भोक्तास्ति दृष्ट्या नष्टकलङ्कया ।

बहवश्चेह कर्तारो दृष्ट्याऽनष्टकलङ्कया ।। ३१

कर्तृताकर्तृते ब्रह्मन्केवलं परिकल्पिते ।

असम्यग्दर्शनेनैव न सम्यग्दर्शनस्य ते ।। ३२

पुष्पाणि तरुखण्डेषु भूतानि भुवनेषु च ।

स्वयमायान्ति यान्तीह कल्पते हेतुनामभिः ।। ३३

अब्बिम्बितस्य चन्द्रस्य चलने कर्त्रकर्तृते ।

न सत्ये नानृते यद्वत्तद्वत्कालस्य सृष्टिषु ।। ३४

मनो मिथ्याभ्रमाभोगे कर्तृताकर्तृतामयीम् ।

करोति कलनां रज्ज्वां भ्रान्तेक्षण इवाहिताम् ।। ३५

तेन मागा मुने कोपमापदामीदृशः क्रमः ।

यद्यथा तत्तथैवाशु सत्यमालोकयाकुलः ।। ३६

न वयं प्रतिभार्थेहा नाभिमानवशीकृताः ।

स्वतो हि तात वशगाः केवलं नियतौ स्थिताः ।। ३७

प्रकृतव्यवहारेहानियतीर्नियतेर्वशात् ।

प्राज्ञाः समभिवर्तन्ते नाभिमानमहातमः ।। ३८

कर्तव्यमेव नियतं केवलं कार्यकोविदैः ।

सुषुप्तिवृत्तिमाश्रित्य कदाचित्त्वं न नाशय ।। ३९

क्व सा ज्ञानमयी दृष्टिः क्व महत्त्वं क्व धीरता ।

मार्गे सर्वप्रसिद्धेऽपि किमन्ध इव मुह्यसि ।। 4.10.४०

स्वकर्मफलपाकोत्थामविचार्य दशां मुने ।

किं मूर्ख इव सर्वज्ञ मुधा मां शप्तुमिच्छसि ।। ४१

देहिनामिह सर्वेषां शरीरं द्विविधं मुने ।

किं न जानासि तं देहमेकमन्यन्मनोभिधम् ।। ४२

तत्र देहो जडोऽत्यर्थमाविनाशपरायणः ।

मनस्तुच्छं च नियतं कदर्थीक्रियते तव ।। ४३

चतुरेण यथा साधो रथः सारथिनोह्यते ।

कुर्वता किंचन स्नेहाद्देहोऽयं मनसा तथा ।। ४४

असत्संकल्पः क्रियते सच्छरीरं विनाश्यते ।

क्षणेन मनसा पङ्कपुरुषः शिशुना यथा ।। ४५

चित्तमेवेह पुरुषस्तत्कृतं कृतमुच्यते ।

तद्बद्धं कलनाहेतोः कलनास्तं विमुच्यते ।। ४६

अयं देह इवात्रस्थमिदमङ्गमिदं शिरः ।

इदं स्फारविकारं तन्मन एवाभिधीयते ।। ४७

मनो हि जीवाज्जीवाख्यं निश्चयैकतया नु धीः ।

अहङ्कारोऽभिमन्तृत्वान्नानाता स्वयमेव हि ।। ४८

देहवासनया चेतस्त्वन्यानि स्वानि चेच्छया ।

पार्थिवानि शरीराणि ह्यसन्ति परिपश्यति ।। ४९

आलोकयति चेत्सत्यं तदा सत्यमयीं मनः ।

शरीरभावनां त्यक्त्वा परामायाति निर्वृतिम् ।। 4.10.५०

तन्मनस्तव पुत्रस्य समाधौ त्वयि संस्थिते ।

स्वमनोरथमार्गेण दूराद्दूरतरं गतम् ।। ५१

इममौशनसं त्यक्त्वा देहं मन्दरकन्दरे ।

प्रयातो वैबुधं सद्म नीडोड्डीनः खगो यथा ।। ५२

तत्र मन्दरगुञ्जेषु पारिजाततलेषु च ।

नन्दनोद्यानखण्डेषु लोकपालपुरेषु च ।। ५३

मुने चतुर्युगान्यष्टौ विश्वाचीं देवसुन्दरीम् ।

असेवत महातेजाः षट्पदः पद्मिनीमिव ।। ५४

तीव्रसंवेगसंपन्नस्वसंकल्पोपकल्पिते ।

अथ पुण्यक्षये जाते नीहार इव शार्वरे ।। ५५

प्रम्लानकुसुमोत्तंसः खिन्नाङ्गावयवोल्लसः ।

स पपात तया सार्धं कालपक्वं फलं यथा ।। ५६

वैबुधं तत्परित्यज्य नभस्येव शरीरकम् ।

भूताकाशमथासाद्य वसुधायां व्यजायत ।। ५७

आसीद्विप्रो दशार्णेषु कोसलेषु महीपतिः ।

धीवरोऽथ महाटव्यां हंसस्त्रिपथगातटे ।। ५८

सूर्यवंशे नृपः पौण्ड्रः सौरशाल्वेषु देशिकः ।

कल्पं विद्याधरः श्रीमान्धीमानथ मुनेः सुतः ।। ५९

मद्रेष्वथ महीपालस्ततस्तापसबालकः ।

वासुदेव इति ख्यातः समङ्गायास्तटे स्थितः ।। 4.10.६०

अन्यास्वपि विचित्रासु वासनावशतः स्वयम् ।

विषमास्वेव पुत्रस्ते चचारान्तरयोनिषु ।। ६१

अभूद्विन्ध्यनगे भूयः किरातः कैकटेषु च ।

सौवीरेष्वथ सामन्तस्त्रिगर्तेषु च गर्दभः ।। ६२

वंशगुल्मः किरातेषु हरिणश्चीनजङ्गले ।

सरीसृपस्तालवृक्षे तमाले वनकुक्कुटः ।। ६३

अयं स पुत्रो भवतो भूत्वा मन्त्रविदां वरः ।

प्रजजाप पुरा विद्यां विद्याधरपुरप्रदाम् ।। ६४

तेनासावभवद्ब्रह्मन्व्योम्नि विद्याधरो महान् ।

हारकुण्डलकेयूरलीलानिचयलालकः ।। ६५

नायिकानलिनीभानुः पुष्पचाप इवापरः ।

विद्याधरीणां दयितो गन्धर्वपुरभूषणः ।। ६६

स कल्पावधिमासाद्य द्वादशादित्यधामनि ।

जगाम भस्मशेषत्वं शलभः पावके यथा ।। ६७

जगन्निर्माणरहिते स्फारे नभसि सा ततः ।

वासना तस्य बभ्राम निर्नीडा विहगी यथा ।। ६८

अथ कालेन संजाते विचित्रारम्भकारिणि ।

संसाररचनारम्भे ब्राह्मे रात्रिविपर्यये ।। ६९

सा मुने वासना तस्य वातव्याचलिता सती ।

कृते ब्राह्मणतामेत्य जातोऽद्य वसुधातले ।। 4.10.७०

वासुदेवाभिधानोऽसौ मुने विप्रकुमारकः ।

जातो मतिमतां मध्ये समधीताखिलश्रुतिः ।। ७१

कल्पं विद्याधरो भूत्वा नद्यास्त्वथ महामुने ।

तपश्चरति ते पुत्रः समङ्गायास्तटे स्थितः ।। ७२

विविधविषयवासनानुवृत्त्या खदिरकरञ्जकरालकोटरासु ।

जगति जठरयोनिषु प्रयातो गहनतरासु च काननस्थलीषु ।। ७३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० स्थितिप्रकरणे भार्गवोपाख्याने कालवचनं नाम दशमः सर्गः ।।

१० ।।